श्री ऋषभदेवस्वामिने नमः ।

श्री शान्तिनाथाय नमः । श्री नेमिनाथाय नमः ।

श्री शङ्खेश्वरपार्श्वनाथाय नमः । श्री महावीरस्वामिने नमः ।

श्री गौतमस्वामिने नमः । श्री सद्गुरुभ्यो नमः ॥

ॐ श्रीँ ह्रीँ अर्हँ नमः ।

आचार्यभगवत्-कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिप्रणीतं

स्वोपज्ञलघुवृत्तिविभूषितं

# श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ॥

प्रणम्य परमात्मानं श्रेयः शब्दानुशासनम् ।

आचार्यहेमचन्द्रेण स्मृत्वा किञ्चित् प्रकाश्यते ॥१॥

**अर्हँ ।१।१।१॥**

अर्हँ इत्येतदक्षरं परमेश्वरस्य परमेष्ठिनो वाचकं मङ्गलार्थं शास्त्रस्याऽऽदौ प्रणिदध्महे ॥१॥

**सिद्धिः स्याद्वादात् ।१।१।२॥**

स्याद्वादाद् अनेकान्तवादात् प्रकृतानां शब्दानां सिद्धिः निष्पत्तिर्ज्ञप्तिश्च वेदितव्या ॥२॥

**लोकात् ।१।१।३॥**

अनुक्तानां संज्ञानां न्यायानां च लोकाद् वैयाकरणादेः सिद्धिर्ज्ञप्तिर्वेदितव्या, वर्णसमाम्नायस्य च ॥३॥ तत्र-

**औदन्ताः स्वराः ।१।१।४॥**

---

१. १।१।१ त आरभ्य ७।४।१५७ पर्यन्तानां सर्वेषां लघुवृत्तेरिमे हस्तलिखितादर्शाः सम्पगुल्या- पा१,२,३, खं१,२,३, J3 । एषां सर्वेषां स्वरूपं प्रस्तावनातोऽवगन्तव्यम् ॥ २. अर्हमित्यं खं१, पा१, J3 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

औकारावसाना वर्णाः स्वरसंज्ञाः स्युः । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥४॥

**एक-द्वि-त्रिमात्रा ह्रस्व-दीर्घ-प्लुताः ॥१।१।५॥**

मात्रा कालविशेषः । एक-द्वि-त्र्युच्चारणमात्रा औदन्ता वर्णा यथासंख्यं ह्रस्व-दीर्घ-प्लुतसंज्ञाः स्युः । अ इ उ ऋ ऌ, आ ई ऊ ॠ ॡ, ए ऐ ओ औ, आ ३ ई ३ ऊ ३ इत्यादि ॥५॥

**अनवर्णा नामी ॥१।१।६॥**

अवर्णवर्जा औदन्ता वर्णा नामिसंज्ञाः स्युः । इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥६॥

**ऌदन्ताः समानाः ॥१।१।७॥**

ऌकारावसाना वर्णाः समानाः स्युः । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ॥७॥

**ए-ऐ-ओ-औ सन्ध्यक्षरम् ॥१।१।८॥**

'ए ऐ ओ औ' इत्येते वर्णाः सन्ध्यक्षराणि स्युः ॥८॥

**अं-अः अनुस्वार-विसर्गौ ॥१।१।९॥**

अकाराद्युच्चारणार्थौ 'अं' इति नासिक्यो वर्णः 'अः' इति च कण्ठ्यः यथासंख्यम् 'अनुस्वार-विसर्गौ' स्याताम् ॥९॥

**कादिर्व्यञ्जनम् ॥१।१।१०॥**

कादिर्वर्णो हपर्यन्तो व्यञ्जनं स्यात् । क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म, य र ल व, श ष स ह ॥१०॥

**अपञ्चमान्तस्थो धुट् ॥१।१।११॥**

वर्गपञ्चमा-ऽन्तस्थावर्जः कादिर्वर्णो धुट् स्यात् । क ख ग घ, च छ ज झ, ट ठ ड ढ, त थ द ध, प फ ब भ, श ष स ह ॥११॥

**पञ्चको वर्गः ॥१।१।१२॥**

कादिषु वर्णेषु यो यः पञ्चसंख्यापरिमाणः स स वर्गः स्यात् । क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब

Jain Education International For Private & Personal Use Only www.jainelibrary.org